स्वर्गीय शतावधानी श्रीमद्राजचन्द्रविरचित

# आत्मसिद्धि ।

संस्कृत पद्य-लेखक,

श्रीयुक्त पं० बहेचरदास, न्याय और व्याकरणतीर्थ ।

Taken from Book "Atmasiddhi"
Samskrut Padya Author – Pandit Bahechardas Doshi and Hindi author Padit Udaylal Kashalivaal –
Published by – Mansukhalal Ravjibhai Mehta (1975 – Ashadh Month)
eLibrary Sr. number 002678.

## श्रीमद् राजचन्द्रप्रणीत

# आत्मसिद्धि ।

यत्स्वरूपमविज्ञाय प्राप्तं दुःखमनन्तकम् ।
तत्पदं ज्ञापितं येन तस्मै सद्गुरवे नमः ॥ १ ॥

वर्तमाने कलौ प्रायो मोक्षमार्गस्य लुप्तता ।
सोऽत्राऽतो भाष्यते स्पष्टमात्मार्थिनां विचारणे ॥२॥

केचित् क्रियाजडा जाताः केचिद् ज्ञानजडा जनाः ।
मन्वते मोक्षमार्गं तं दृष्ट्वाऽनुकम्पते मनः ॥ ३ ॥

बाह्यक्रियासमासक्ता विवेकविकला नराः ।
ज्ञानमार्गं निषेधन्तस्तेऽत्र क्रियाजडा मताः ॥ ४ ॥

'कल्पितौ बन्ध-मोक्षौ स्तः' इति वाग् यस्य केवलम् ।
चरितं मोहनापूर्णं तेऽत्र ज्ञानजडा जनाः ॥ ५ ॥

वैराग्यादि तदाऽवन्ध्यं यद्यात्मज्ञानयोगयुक् ।
तथैव हेतुस्तच्चैव विवेकज्ञानप्राप्तये ॥ ६ ॥

यस्य चित्ते न त्यागादि न हि स ज्ञानवान् भवेत् ।
ये तु त्यागादिसंसक्ता निजतां विस्मरन्ति ते ॥ ७ ॥

यद् यत्र वर्तते योग्यं तद् ज्ञेयं तत्र योगतः ।
तत् तथैव समाचर्यमेतदात्मार्थिलक्षणम् ॥ ८ ॥

यः श्रयेत् सद्गुरोः पादान् स्वाग्रहत्यागपूर्वकम् ।
प्राप्नुयात् परमं तत्त्वं जानीयाद् निजतां ध्रुवम् ॥ ९

आत्मज्ञानी समानेक्षी उदयाद् गतियोगवान् ।
अपूर्ववक्ता सद्ज्ञानी सद्गुरुरेष उच्यते ॥ १० ॥

प्रत्यक्षसद्गुरुतुल्या परोक्षोपकृतिर्न हि ।
अकृत्वैतादृशं लक्ष्यं नोद्गच्छेदात्मचारणम् ॥ ११ ॥

विना सद्गुरुवाचं हि ज्ञायते न जिनात्मता ।
ज्ञाने तु सुलभा सैवाऽज्ञाने उपकृतिः कथम् ? ॥१२॥

यत्र प्रत्यक्षता नास्ति सद्गुरुतातपादीया ।
सत्पात्रे शरणं शास्त्रं तत्रात्मादिनिरूपकम् ॥ १३ ॥

सद्गुरुणाऽथवा प्रोक्तं यद् यदात्महिताय तत् ।
नित्यं विचार्यतामन्तस्त्यक्त्वा पक्ष-मतान्तरम् ॥१४॥

रुन्धीत जीवः स्वातन्त्र्यं प्राप्नुयान्मुक्तिमेव तु ।
एवमनन्ताः संप्राप्ता उक्तमेतज्जिनेश्वरैः ॥ १५ ॥

प्रत्यक्षसद्गुरुयोगात् स्वातन्त्र्यं रुध्यते तकत् ।
अन्यैस्तु साधनोपायैः प्रायो द्विगुणमेव स्यात् ॥ १६

वर्तनं सद्गुरुलक्ष्ये त्यक्त्वा स्वातन्त्र्यमात्मनः ।
मताग्रहं च, सम्यक्त्वमुक्तं प्रत्यक्षकारणात् ॥१७॥

स्वातन्त्र्यान्न हि हन्यन्ते महामानादिशत्रवः ।
सद्गुरोः शरणे प्राप्ते नाशस्तेषां सुसाधनः ॥ १८ ॥

यत्सद्गुरूपदेशे यः प्रापद् ज्ञानमपश्चिमम् ।
छाद्मस्थ्येऽपि गुरोस्तस्य वैयावृत्त्यं करोति सः ॥१९

विनयस्येदृशो मार्गो भाषितः श्रीजिनेश्वरैः ।
एतन्मार्गस्य मूलं तु कश्चिज्जानाति भाग्यवान् ॥२०॥

यद्यसद्गुरुरेतस्य किञ्चिल्लाभं लभेत तु ।
महामोहवशान्मज्जेद् भवाम्भोधौ भयंकरे ॥ २१ ॥

मुमुक्षुर्यदि जीवः स्याज्जानातीमां विचारणाम् ।
मतार्थी यदि जीवः स्याज्जानीयाद् विपरीतताम्॥

मतार्थी पुरुषो यः स्यान्नात्मान्वेषी स संभवेत् ।
तस्याऽत्र लक्षणं प्रोक्तं पक्षदोषविवर्जितम् ॥ २३ ॥

ज्ञानहीनं गुरुं सत्यं बाह्यत्यागपरायणम् ।
मन्येत, वा ममत्वं वै कुलधर्मगुरौ धरेत् ॥ २४ ॥

जिनस्य ऋद्धिं देहादिमानं च जिनवर्णनम् ।
मनुते, स्वीयबुद्धिं यस्तत्रैवाऽभिनिविशते ॥ २५ ॥

प्रत्यक्षसद्गुरोर्योगे कुर्याद् दृष्टिविमुखताम् ।
योऽसद्गुरुं दृढीकुर्यान्निजमानाय मुख्यतः ॥ २६ ॥

देवादिगतिभङ्गेषु जानीयाच्छ्रुतज्ञानताम् ।
मन्यते निजवेषं यो मुक्तिमार्गस्य कारणम् ॥ २७ ॥

अप्राप्ते लक्षणे वृत्तेर्वृत्तिमत्त्वाभिमानिता ।
परमार्थं न विन्देद् यो लोकपूजार्थमात्मनः ॥ २८ ॥

यः शुष्कः शब्दमात्रेण मन्येत निश्चयं नयम् ।
सद्व्यवहारमालुम्पेद् गच्छेच्च हेतुहीनताम् ॥ २९ ॥

ज्ञानावस्थां न यः प्राप्तस्तथा साधनसद्दशाम् ।
कुर्वाणस्तेन संगं ना ब्रुडेत् संसारसागरे ॥ ३० ॥

मतार्थी जीव एषोऽपि स्वीयमानादिहेतुना ।
प्राप्नुयान्न परं तत्त्वमनधिकारिकोटिगः ॥ ३१ ॥

कषायोपशमो नैव नान्तर्विरक्तिमत् तथा ।
सरलत्वं न माध्यस्थ्यं तद् दौर्भाग्यं मतार्थिनः ॥३२

मतार्थिलक्षणं प्रोक्तं मतार्थत्यागहेतवे ।
आत्मार्थिलक्षणं वक्ष्येऽधुनाऽऽत्मसुखहेतवे ॥ ३३ ॥

आत्मज्ञानं भवेद् यत्र तत्रैव गुरुता ऋता ।
कुलगुरोः कल्पना ह्यन्या एवमात्मार्थिमान् ना ॥ ३४

प्रत्यक्षसद्गुरुप्राप्तेर्विन्देदुपकृतिं पराम् ।
योगत्रिकेन एकत्वाद् वर्तेताऽऽज्ञापरो गुरोः ॥३५॥

त्रिषु कालेषु एकः स्यात् परमार्थपथो ध्रुवम् ।
प्रेरयेत् परमार्थं तं ग्राह्यो व्यवहार आमतः ॥ ३६ ॥

अन्तरेवं समालोच्य शोधयेत् सद्गुरोर्युजिम् ।
कार्यमात्मार्थमेकं तद् नापरा मानसी रुजा ॥ ३७ ॥

उपशान्तिः कषायाणां निर्वाणे केवलं गृधिः ।
भवे खेदो दया सत्त्वे तत्राऽऽत्मार्थत्वसंगतिः ॥३८॥

एतादृशीं दशां यावद् योग्यां जीवो लभेत न ।
मुक्तिमार्गं न प्राप्नोति तावच्चाऽस्त्यान्तरी रुजा ॥३९॥

स्यादीदृशी दशा यत्र सद्गुरुबोधपूर्विका ।
सद्विचारः तयाऽऽविस्स्यात् सुखदोऽदुःखदो नृणाम्

सद्विचारो भवेद् यत्र तत्राऽऽत्मत्वप्रकाशनम् ।
तेन मोहं क्षयं नीत्वा प्राप्नुयान्निर्वृतिपदम् ॥ ४१ ॥

संभवेत् सद्विचारो यैः सुज्ञानं मुक्तिवर्त्म च ।
तानि वक्ष्ये पदानि षट् संवादे गुरु-शिष्ययोः ॥४२

जीवोऽस्ति स च नित्योऽस्ति कर्ताऽस्ति निजकर्मणः ।
भोक्तास्ति च पुनर्मुक्तिर्मुक्त्युपायः सुदर्शनम् ॥ ४३

षट्स्थानीयं समासेन दर्शनानि षडुच्यते ।
[ षड्दर्शन्यपि उच्यते ]
प्रोक्ता सा ज्ञानिभिर्ज्ञातुं परं तत्त्वं धरास्पृशाम् ॥४४

अदृश्यत्वादरूपित्वाज्जीवो नास्त्येव भेदभाक् ।
अनुभूतेरगम्यत्वान्नृशङ्कत्येव केवलम् ॥ ४५ ॥
[ नृशङ्कत्येव भो गुरो ! ]

देह एव वा जीवोऽस्ति प्राणरूपोऽथवा स च ।
इन्द्रियात्मा तथा मन्यो नैवं भिन्नो ह्यलक्षणः ॥४६

यदि स्याद् भेदवान् जीवोऽनुभूयेत कथं न हि ? ।
यदस्ति सकलं तत् तु ज्ञायते कच-काचवत् ॥ ४७

अरेऽतो नैव आत्माऽस्ति ततो मुक्तिप्रथा वृथा ।
एनामाभ्यन्तरीं रेकामुत्कीलय प्रभो! प्रभो! ॥४८॥

अध्यासाद् भासिता देह-देहिनोः समता, न सा ।
तयोर्द्वयोः सुभिन्नत्वाल्लक्षणैः प्रकटैरहो ! ॥ ४९ ॥

अध्यासाद् भासिता देह-देहिनोः समता, न सा ।
तयोर्द्वयोः सुभिन्नत्वादसिकोशायते ध्रुवम् ॥ ५० ॥

दृष्टेर्दृष्टाऽस्ति यो वेत्ति, रूपं सर्वप्रकारगम् ।
भात्यऽबाध्याऽनुभूतिर्या साऽस्ति जीवस्वरूपिका ५१

स्वस्वविषये संज्ञानं प्रतीन्द्रियं विभाति भोः ! ।
परं तु तेषां सर्वेषां जागर्ति मानमात्मनि ॥ ५२ ॥

न तद् जानाति देहोऽयं नैव प्राणो न चेन्द्रियम् ।
सत्तया देहिनो देहे तत्प्रवृत्तिं निबोध रे ! ॥ ५३ ॥

योऽवस्थासु समस्तासु ज्ञायते भेदभाक् सदा ।
चेतनतामयः स्पष्टः स ह्यात्मा नान्यलक्षणः ॥ ५४ ॥

घटादिसर्वं जानासि अतस्तन्मन्यसे शिशो ।
तं न जानासि ज्ञातारं तद् ज्ञानं ब्रूहि कीदृशम् ॥५५

कृशे देहे घना बुद्धिरघना स्थूलविग्रहे ।
स्याद् देहो यदि आत्मैव नैवं तु घटना भवेत् ॥५६

केवलं भिन्न एवाऽस्ति स्वभावो जड-जीवयोः ।
कदापि न तयोरैक्यं द्वैतं कालत्रिके तयोः ॥ ५७ ॥

आत्मानं शङ्कते आत्मा स्वयमज्ञानतो ध्रुवम् ।
यः शङ्कते स वै आत्मा स्वेनाऽहो! स्वीयशङ्कनम् ५८

शिष्ये भगवता प्रोक्ता आत्माऽस्तित्वस्य युक्तयः ।
ततः संभवनं तस्य ज्ञायतेऽन्तर्विचारणात् ॥ ५९ ॥

तथाऽपि तत्र शङ्काऽऽत्मा नश्वरः, नाऽविनश्वरः ।
देहसंयोगजन्माऽस्ति देहनाशात् तु नाशभाक् ॥६०॥

अथवा क्षणिकं वस्तु परिणामि प्रतिक्षणम् ।
तदनुभवगम्यत्वान्नाऽऽत्मा नित्योऽनुभूयते ॥ ६१ ॥

देहमात्रं तु संयोगि दृश्यं रूपि जडं घनम् ।
जीवोत्पत्ति-लयावत्र नीतौ केनाऽनुभूतिताम् ?॥६२॥

उत्पत्ति-लयबोधौ तु यस्यानुभववर्तिनौ ।
स ततो भिन्न एव स्यान्नान्यथा बोधनं तयोः ॥६३॥

दृश्यन्ते ये तु संयोगा ज्ञायन्ते ते सदात्मना ।
नाऽत्मा संयोगजन्योऽतः किन्त्वात्मा शाश्वतः स्फुटम्

जडादुत्पद्यते जीवो जीवादुत्पद्यते जडम् ।
एषाऽनुभूतिः कस्यापि कदापि क्वाऽपि नैव रे! ॥६५

यस्योत्पत्तिस्तु केभ्योऽपि संयोगेभ्यो न जायते ।
न नाशः संभवेत् तस्य जीवोऽतो ध्रुवति ध्रुवम् ६६

क्रोधादितारतम्यं यत् सर्प-सिंहादिजन्तुषु ।
पूर्वजन्मजसंस्कारात् तत् ततो जीवनित्यता ॥६७॥

आत्माऽस्ति द्रव्यतो नित्यः पर्यायैः परिणामभाक् ।
बालादिवयसो ज्ञानं यस्मादेकस्य जायते ॥ ६८ ॥

क्षणिकं वस्त्विति ज्ञात्वा यः क्षणिकं वदेदहो ! ।
स वक्ता क्षणिको नाऽस्ति तदनुभवनिश्चितम् ॥६९॥

कदाऽपि कस्यचिन्नाशो वस्तुनो नैव केवलम् ।
चेतना नश्यति चेत् तु किंरूपः स्याद् गवेषय ? ७०

आत्मा नो कर्मणः कर्ता कर्मकर्ताऽस्ति कर्म वै ।
वा सहजः स्वभावः स्यात् कर्मणो जीवधर्मता ॥ ७१

स्यादसंगः सदा जीवो बन्धो वा प्राकृतो भवेत् ।
वेश्वरप्रेरणा तत्र ततो जीवो न बन्धकः ॥ ७२ ॥

ततः केनाऽपि हेतुना मोक्षोपायो न गम्यते ।
जीवे कर्मविधातृत्वं नास्त्यस्ति चेन्न नश्यताम् ॥ ७३

चेतनप्रेरणा न स्यादाददद्यात् कर्म कः खलु ? ।
प्रेरणा जडजा नाऽस्ति वस्तुधर्मो विचार्यताम्॥७४॥

यदि जीवक्रिया न स्यात् संग्रहो नैव कर्मणः ।
अतो न सहजो भावो नैव वा जीवधर्मता ॥ ७५ ॥

यदि स्यात् केवलोऽसङ्गः कथं भासेत न त्वयि ? ।
तत्त्वतोऽसंग एवाऽस्ति किंतु तन्निजबोधने ॥ ७६ ॥

नेश्वरः कोऽपि कर्ताऽस्ति स वै शुद्धस्वभावभाक् ।
यदि वा प्रेरके तत्र मते दोषप्रसङ्गता ॥ ७७ ॥

यदाऽऽत्मा वर्तते सौवे स्वभावे तत्करस्तदा ।
यदात्मा वर्ततेऽसौवे स्वभावेऽतत्करस्तदा ॥ ७८ ॥

स्तादात्मा कर्मणः कर्ता किन्तु भोक्ता न युज्यते ।
किं जानाति जडं कर्म येन तत् फलदं भवेत् ॥७९॥

भवेदीश्वरः फलदस्तदाऽत्मा भोगभाग् भवेत् ।
अप्यैश्वर्यं न युज्येत ईश्वरे फलदे मते ॥ ८० ॥

असिद्धे ईश्वरे नैव युज्यते जगतः स्थितिः ।
शुभाऽशुभविपाकानां ततः स्थानं न विद्यते ॥८१॥

भावकर्म निजा क्रान्तिरतश्चेतनरूपता ।
जीववीर्यस्य स्फूर्तेस्तु लाति कर्मचयं जडम् ॥ ८२ ॥

विषं सुधा न वित्तोऽपि खादकः फलमाप्नुयात् ।
एवमेव शुभाऽशुभकर्मणो जीवभोक्तृता ॥ ८३ ॥

एको रङ्कः प्रजापोऽन्यः इत्यादिभेददर्शनम् ।
कार्यं नाऽकारणं क्वाऽपि वेद्यमेवं शुभाऽशुभम्॥८४

ईश्वरः फलदस्तत्राऽऽवश्यको न हि कर्मणि ।
परिणमेत् स्वभावात् तद् भोगाद् दूरं विनश्यति८५

तत्तद्भोग्यविशेषाणां स्थानं द्रव्यस्वभावता ।
वार्तेयं गहना शिष्य ! संक्षेपे सर्वथोदिता ॥ ८६ ॥

कर्ता भोक्ताऽस्तु जीवोऽपि तस्य मोक्षो न विद्यते ।
व्यतीतोऽनन्तकः कालस्तथाऽप्यात्मा तु दोषभाक् ८७

शुभकर्मकरो जीवो देवादिपदवीं व्रजेत् ।
अशुभकर्मकृज्जीवः श्वभ्रं, न क्वाऽप्यकर्मकः ॥८८॥

यथा शुभाशुभं कर्म जीवव्यापारतः फलि ।
फलवन्निर्वाणमप्यस्य तदव्यापारतस्तथा ॥ ८९ ॥

सदसत्कर्मणो भावादनन्तः समयो गतः ।
संपद्येत तदुच्छेदे जीवे मुक्तिस्वभावता ॥ ९० ॥

आत्यन्तिको वियोगो यो देहादियोगजः खलु ।
तन्निर्वाणं समाख्यातं तत्राऽनन्तसुखैकता ॥ ९१ ॥

मोक्षस्थानं कदापि स्यान्नाऽविरोध्युपायि तत् ।
अनन्तकालजः कर्मचयच्छेद्यः कथं भवेत् ? ॥९२॥

वा मतानि सुभिन्नानि नैकोपायप्रदर्शीनि ।
मतं सत्यं तु किं तत्र शक्यैषा न विवेकिता ॥ ९३ ॥

कस्यां जातौ भवेन्मोक्षो वेषे कस्मिंश्च निर्वृतिः ? ।
निश्चेतुमेतन्नो शक्यं बहुभेदो हि दूषणम् ॥ ९४ ॥

तत एवं हि संसिद्धं मोक्षोपायो न विद्यते ।
जीवादिज्ञानसंप्राप्तौ कोपकारो भवेदहा !! ॥ ९५ ॥

प्रश्नपञ्चोत्तरे लब्धे समाधिः सकलोऽजनि ।
यदि तत् साधनं विद्यां शिवं श्रेयो भवेच्छिवम् ९६

पञ्चोत्तरेण संजाता प्रतीतिस्तव ह्यात्मनि ।
मोक्षोपायस्तथा तात ! एष्यति सहजं मनः ॥ ९७ ॥

अज्ञानं कर्मभावोऽस्ति मोक्षभावो निजस्थितिः ।
ज्वलिते ज्ञानदीपे तु नश्येदज्ञानतातमः ॥ ९८ ॥

यो यो बन्धस्य हेतुः स्याद् बन्धमार्गो भवेत् स सः ।
बन्धोच्छेदस्थितिर्या तु मोक्षमार्गो भवान्तकः ॥९९॥

रागो द्वेषस्तथाऽज्ञानं कर्मणां ग्रन्थिरग्रगा ।
यस्मात् तकन्निवृत्तिः स्यान्मोक्षमार्गः स एव भोः !

संश्चेतनामयो जीवः सर्वाभासविवर्जितः ।
प्राप्यते स यतः शुद्धो मोक्षमार्गः स एव भोः ! ॥१०१॥

अनन्तभेदकं कर्म चाष्टौ मुख्यानि तेष्वपि ।
तत्राऽपि मोहना मुख्या वक्ष्ये तद्धनने विधिम् ॥१०२॥

मोहनं द्विविधं तत्र दृष्टि-चारित्रभेदतः ।
बोधो हि दर्शनं हन्याच्चारित्रं रागहीनता ॥ १०३ ॥

क्रोधादियोगतः कर्मबन्धः शान्त्यादिघातकः ।
अत्रानुभूतिः सर्वेषां तत्र का संशयालुता ? ॥ १०४ ॥

मतदृष्ट्याग्रहं त्यक्त्वा विकल्पाचरणं तथा ।
आराध्येतोक्तमार्गो यैः तेषां हि जननाल्पता ॥ १०५ ॥

पदषट्कस्य षट् प्रश्नाः पृष्टाः संचिन्त्य रे ! त्वया ।
तत्पदानां समूहत्वे मुक्तिवासः सुनिश्चितम् ॥ १०६ ॥

जातेर्वेषस्य नो भेदो यदि स्यादुक्तमार्गता ।
तां तु यः साधयेत् सद्यो न काचित् तत्र भिन्नता १०७

कषायस्योपशान्तत्वं मोक्षे रुचिर्हि केवलम् ।
भवे खेदो दया चित्ते सा जिज्ञासा समुच्यते ॥ १०८ ॥

सद्गुरोर्बोधमाप्नुयात् स जिज्ञासुर्नरो यदि ।
तदा सम्यक्त्वलाभः स्यादात्मशोधनता अपि ॥ १०९ ॥

मतदृष्ट्याग्रहैर्हीना यद्वृत्तिर्गुरुपादयोः ।
स संलभेत सम्यक्त्वं यत्र भेदो न पक्षता ॥ ११० ॥

अनुभूतिः स्वभावस्य तल्लक्ष्यं तत्र प्रत्ययः ।
निजतां संवहेद् वृत्तिः सत्यं सम्यक्त्वमुच्यते ॥ १११ ॥

भूत्वा वर्द्धिष्णु सम्यक्त्वं मिथ्याभासं प्रटालयेत् ।
चारित्रस्योदयस्तत्र वीतरागपदस्थितिः ॥ ११२ ॥

केवलं स्वस्वभावस्य स्थिरा यत्र भवेन्मतिः ।
सोच्यते केवलज्ञानं देहे सत्यपि निर्वृतिः ॥ ११३ ॥

स्वप्नोऽपि कोटिवर्षस्य निद्रोच्छेदे समाप्यते ।
विभावोऽनादिजो दूरे नश्येद् ज्ञाने तथा सति ॥११४॥

देहाध्यासो यदि नश्येत् त्वं कर्ता न हि कर्मणाम् ।
न हि भोक्ता च तेषां त्वं धर्मस्यैतद् गूढं मतम् ॥११५॥

मोक्ष एव ततो धर्मान्मोक्षात्मा च त्वमेव भोः ! ।
अनन्तदर्शनं त्वं च अव्याबाधरूपस्त्वकम् ॥ ११६ ॥

शुद्धो बुद्धश्चिदात्मा च स्वयंज्योतिः सुखालयम् ।
विचारय ततो विद्धि स्वं बहु तु किमुच्यते ? ॥ ११७ ॥

सर्वेषां ज्ञानिनामत्र समास्तिमेति निश्चयः ।
उक्त्वैवं गुरुणा मौनं समाधौ सहजे धृतम् ॥ ११८ ॥

सद्गुरोरुपदेशात् त्वाऽऽगतं भानमपूर्वकम् ।
निजे निजपदं लब्धमज्ञानं लयतां गतम् ॥ ११९ ॥

तद् भासितं निजं रूपं शुद्धं चैतन्यलक्षणम् ।
अजरं चामरं स्थास्नु देहातीतं सुनिर्मलम् ॥ १२० ॥

यदा विभावभावः स्याद् भोक्ता कर्ता च कर्मणः ।
यदाऽविभावभावः स्याद् भोक्ता कर्ता न कर्मणः १२१

स्वाभाविक्यस्ति वा वृत्तिः शुद्धा या चेतनामयी ।
तस्याः कर्ताऽस्ति भोक्ताऽस्ति निर्विकल्पस्वरूपभाक् १२२

उक्तो मोक्षो निजा शुद्धिः स मार्गो लभ्यते यतः ।
संक्षेपेणोदितः शिष्य ! नैर्ग्रन्थः सकलः पथः ॥ १२३ ॥

कृपापानीयकूपार ! गुरुदेव ! अहो ! अहो ! ।
अयमुपकृतो दीनश्चोपकारस्त्वहो ! अहो ! ॥ १२४ ॥

प्रभोः पादे धरेयं किमात्मतो हीनकं समम् ।
अर्पितः प्रभुणा सोऽस्ति भवेयं तद्वशंवदः ॥ १२५ ॥

अद्यतस्तच्छरीरादि जायतां प्रभुचेटकम् ।
दासो दासोऽस्मि दासोऽस्मि तत्प्रभोर्दीनशेखरः ॥ १२६

स्थानषट्कं विसंज्ञाप्य भिन्नं दर्शितवान् भवान् ।
असिकोशमिवाऽऽत्मानं चामितोऽयमनुग्रहः ॥ १२७ ॥

स्थानषट्के समाप्यन्ते दर्शनानि षडेव भोः ! ।
न तत्र संशयः कोऽपि यद्यालोच्येत विस्तरम् ॥ १२८ ॥

आत्मभ्रान्तिसमो रोगो नास्ति भिषग् गुरूपमः ।
गुरोराज्ञासमं पथ्यं ध्यानतुल्यं न चौषधम् ॥ १२९ ॥

प्रेप्सवः परमार्थं ये ते कुर्वन्त्वात्मपौरुषम् ।
भवस्थित्यादिहेतोस्तु न च्छिन्दन्तु निजं बलम् ॥१३०॥

आकर्ण्य निश्चितां वाणीं त्याज्यं नैव सुसाधनम् ।
रक्षित्वा निश्चये लक्ष्यमाचर्यः साधनाचयः ॥ १३१ ॥

निश्चयो व्यवहारो वा नात्रैकान्तेन दर्शितः ।
यत्र स्थाने यथायोग्यं तथा तद् युगलं भवेत् ॥ १३२ ॥

सद्व्यवहारहीनाऽस्ति कल्पना मत-गच्छयोः ।
निजभानाद् ऋते तात! निश्चयो न हि सुन्दरः ॥१३३॥

अभूवन् ज्ञानिनः पूर्वं वर्तन्ते ये च नाऽऽगताः ।
विदां तेषां समेषां वै मार्गभेदो न विद्यते ॥ १३४ ॥

सिद्धतुल्यान् समान् जीवान् यो जानाति भवेत् स सः।
अर्हत्स्थितिर्गुरोराज्ञा निमित्तं तत्र विद्यते ॥ १३५ ॥

उपादानच्छलेनैव निमित्तानि त्यजन्ति ये।
लभन्ते सिद्धभावं नो भ्रान्ताः स्युस्ते उत ध्रुवम् ॥१३६

वक्ति ज्ञानकथां वक्त्राच्चित्तं मोहतमावृतम्।
यस्य रङ्कस्य मर्त्यस्य ज्ञानिद्रोही स केवलम् ॥ १३७ ॥

दया शान्तिः क्षमा साम्यं वैराग्यं त्याग-सत्यते।
मुमुक्षुहृदये नित्यमेते स्युः प्रकटा गुणाः ॥ १३८ ॥

यत्राऽस्ति मोहनं क्षीणं वा प्रशान्तं भवेत् तकत्।
वाच्या ज्ञानिदशा साऽन्या भ्रान्तता स्पष्टमुच्यते १३९

उच्छिष्टान्नायमानं वा स्वप्नवद् वेत्ति यो जगत्।
एषा ज्ञानिस्थितिर्वाच्या शेषं वाग्जालमामतम् ॥ १४० ॥

स्थानपञ्चकमालोच्य षष्ठके यः प्रवर्तते।
प्राप्नुयात् पञ्चमं स्थानं नाऽत्र शङ्काकणोऽपि रे! ॥१४१

देहातीता दशा यस्य देहे सत्यपि वर्तते।
तज्ज्ञानिचरणे मेऽस्तु वन्दनाऽगणिता त्रिधा ॥ १४२ ॥

श्रीसद्गुरुचरणार्पणमस्तु ।

सं० १९५२ कुँवार विदी १,
गुरुवार, नड़ियाद ।